# यज्ञः पर्यावरणेऽस्य प्रभावश्च

**Dinesh Pandey**

Shri M.M. Town P.G. College, Baliya (U.P.)

***Abstract***

*The universe is facing an alarming fear of dire consequences of polluted environment. An effort is being made from each corner of scientific reserches to meet the challenges regarding this pollution - control. The Yajna on the sacrifice, mentioned in the Vedic scriptures is seemingly the only remedy to the said problem. The article is aimed at the problems before the world and at their solution through the yajna.*

भारतीयसंस्कृतौ वेदपुराणेषु च यज्ञानामतिशयितं महत्त्वं निरूपितमस्ति। यज्ञोऽयं दैवीसंस्कृतेः शाश्वतः प्रतीकोऽस्ति। वस्तुतः भारतीयसंस्कृतिः यज्ञपरकैव। वेदाः, ये परमात्मनो निःश्वासभूताः सन्ति, तेषां मुख्यप्रवृत्तयः यज्ञानामनुष्ठानविधाने सन्ति। इत्थं परमात्मा यज्ञमाध्यमेन विश्वसंरक्षणं करोति। समेषां वैश्विकक्रियाकलापानामक्षे यज्ञस्यैव स्थितिः अस्ति। तमेवाश्रित्य विश्वब्रह्माण्डस्य गतिचक्रं घूर्णनं करोति। अतएव वैदिकऋषिभिः यज्ञोऽयं भुवनस्य किं वा समग्रसृष्टेराधारबिन्दुः उक्तोऽस्ति – 'अयं यज्ञो भुवनस्य नाभिः।[1] विश्वस्य सर्जनमथ च पालनं यज्ञप्रक्रिया एव फलमस्ति। ऋग्वेदस्य नासदीयसूक्ते पुरुषसूक्ते च सृष्टिविज्ञानस्य विशदं विवेचनं विद्यते। तत्र पुरुषसूक्ते निगदितमस्ति यत् सर्वेषां वेदानां, पशुपक्षिमनुष्यादि-जीवानां, सूर्यचन्द्रादिदेवानां च सृष्टिः यज्ञपुरुषादेव जाता।[2] यज्ञेनैव सर्वेषां देवानां, प्रजानां पृथिव्याः सर्वप्राणिनां च स्थितिः अस्ति। सृष्टेः समस्तं कार्यं यज्ञमयं विद्यते तथा च यज्ञेनैव सञ्चालितमस्ति। इदं सम्पूर्णं जगदपि यज्ञमयमस्ति– 'सर्वयज्ञमयं जगत्[3] – (का०पु०)। प्रकृतिः स्वयमेव अध्वर्युरूपेण यजनं करोति। ब्रह्माण्डेऽस्मिन् यत्किञ्चदपि भवति, तदेव प्रतीकरूपेण यज्ञे क्रियते। यज्ञः सृष्टिनियमानां क्रियान्वयने सहाय्यमपि करोति। यज्ञेन पृथिव्याः अन्तरिक्षस्य च सर्वे पदार्थाः सूर्यस्य रश्मयः पर्यावरणं च पवित्राणि भवन्ति।[4] यज्ञः वेदशास्त्रेषु सर्वत्र सकलकल्याणकारकः सकलसृष्टिसंरक्षकश्च कथितोऽस्ति।[5]

'यज् – देवपूजासंगतिकरणदानेषु च' इति धातोः नङ् प्रत्ययेन निष्पन्नस्य यज्ञशब्दस्य त्रयः अर्थाः भवन्ति – देवशक्तीनां पूजा, संगतिकरणं दानञ्च। ईश्वरीयदिव्यशक्तीनाम् आराधनमुपासनं वा, तासां संगतिः (समीप्यं), स्वीयवस्तूनां देवानां कृते त्यागः समर्पणं च – एतदेव यज्ञस्य आध्यात्मिकी प्रक्रियास्ति। कात्यायनश्रौतसूत्रे देवविशेषाय द्रव्यस्य अग्नौ प्रक्षेपः यज्ञः कथितोऽस्ति – 'द्रव्यं देवतात्यागः'।[6] यज्ञेषु देवेभ्यः समर्पणमेतदर्थमप्यभीष्टमस्ति, यतो हि देवैः न कस्यापि वस्तुनः सञ्चयः क्रियते, अपि तु समर्पितस्य वस्तुनः अगणितं विस्तारं कृत्वा पुनः तद् मानवकल्याणाय प्रत्यर्प्यते – एतदेव यज्ञस्य तत्त्वदर्शनमस्ति।

अस्य यज्ञस्योत्पत्तिः सृष्टिप्रारम्भे एवाभवत्।[7] परमेश्वरोऽपि सृष्टियज्ञमाध्यमेन जगतः सृष्टिश्चकार। ऋग्वेदसंहितायाः प्रारम्भः एव यज्ञस्य वर्णनेन भवति।[8] यजुर्वेदशब्दोऽपि यज्ञप्रतिपादक-संहितावाचकः। 'यज्ञेन यज्ञमयजन्त देवाः[9] इत्यनेन स्पष्टं भवति यद् देवाः यज्ञेन यज्ञसम्पादन कुर्वन्। अस्य यज्ञस्य प्रथमं ज्ञानं सर्वप्रथमथर्वा ऋषिः (मानवेभ्यः) अददात् – "यज्ञैरथर्वा प्रथमः .....”। यज्ञः वैदिककाले लौकिकपारलौकिकफलप्राप्तेः सुकरं साधनमासीत्। यज्ञस्योद्देश्यं शमनं शान्तिर्वाप्यस्ति।[10] यज्ञानुष्ठानेन आधिभौतिकाधिदैविकाध्यात्मिकत्रिविधतापानां शमनं सर्वत्र सुखशान्तेरुदयश्च भवति[11] यज्ञकर्ता अक्षयं सुखमाप्नोति।[12] अतएव न केवलम् ऋषिमुनयः अपितु गृहस्थाः अपि नित्यं प्रतिदिनं यज्ञानुष्ठानं प्रकुर्वन्ति स्म।

वैदिकचिन्तनानुसारम् इयं समग्रा सृष्टिः तदन्तर्गतमस्मदीयं शरीरं च पञ्चमहाभूततत्त्वैः विनिर्मितमस्ति। पञ्चमहाभूततत्त्वानि तावदिमानि वर्तन्ते – पृथिवी, आपः, तेजः, (अग्निः) वायुः आकाशश्च। आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी च समुत्पन्ना, येन समग्रसृष्टेः संरचनमभवत् – इति सुविदितं तथ्यमस्ति। एतानि पञ्च तत्त्वानि मिथः अन्योन्याश्रितानि सन्ति। पृथिव्यां स्थिताः मानवाः, विविधाः जीवजन्तवः वनस्पतयश्च पञ्चभ्यः तत्त्वेभ्यः निःसृतैः सूक्ष्मांशैः निर्मिताः सर्वदैव तेषामाश्रये एव तिष्ठन्ति। एतेषां पञ्चमहाभूतानां समुचितं सन्तुलनमेव शुद्धं पर्यावरणमस्ति। परि+आङ् + वृ + ल्युट् प्रत्ययेन निष्पन्नस्य पर्यावरणशब्दस्य 'यद् आवृणोति सर्वान् तत् पर्यावरणमि'ति व्युत्पन्नोऽर्थोऽस्ति। एतानि प्राकृतिकपर्यावरणानि सर्वथैव मानवोपकारकाणि सर्वान् आवृत्य तिष्ठन्ति। वैदिक वाङ्मयानुसारम् उक्तेषु पञ्चतत्त्वेषु

Vijnana Bharati

प्राकृतिकसमरसतायाम् (Natural harmony) असन्तुलनं पर्यावरणप्रदूषणस्य कारणं भवति यत् वातावरणम् अस्माकं जीवनं च दुष्प्रभावयति। अथर्ववेदे पर्यावरणप्रदूषकपदार्थनामुल्लेखः कृतोऽस्ति, येन पारिस्थितिकी तंत्रं मानवजीवनं च संकटापन्नं भवति। हरितः पर्वताः, वर्षाः, नद्यः, निर्झराः, वनानि, सूर्यस्य रश्मयः प्रातः वायवश्च वातावरणं पर्यावरणं वा शुद्धं कुर्वन्ति।१३

अथर्ववेदानुसारं वायुः जलं च प्राकृति ओषधयः१४ इव पवित्रे स्तः – 'आपोवाता औषधयः'। अतः एतद् द्वयं शुद्धं भवेत्, एतदर्थं प्रयतनीयम्। शुद्धः वायुः जलं च मानवजीनाय अपरिहार्ये स्तः। वैदिकवाङ्मये सामान्यवायुः 'वात-वायुः' इति रूपेण उल्लिखितोऽस्ति, 'प्राणवायुः', विशुद्धवायुर्वा "Oxygen" इत्यर्थे प्रयुक्तोऽस्ति। ऋग्वेदस्य एकस्मिन् मन्त्रे शुद्धवायुः (Oxygen) अमृसदृशः कथितोऽस्ति।[१५] अतः अयं स्वाप्राकृतिकशुद्धस्वरूपेण संरक्षणीयोऽस्ति। ऋग्वेदस्य तृतीयमण्डलस्य अन्यस्मिन् मन्त्रे उक्तोऽस्ति यत् यदि वनानि वनस्पतयश्च विनष्टाः भवन्ति, तर्हि शुद्धवायुस्तरः (Oxygen level) खनिजसम्पदश्च दुष्प्रभाविताः भविष्यन्ति, यतो हि वृक्षाः वनस्पतयश्च पृथिव्यन्तःस्थबहुमूल्यसम्पदः संरक्षिकाः सन्ति। आश्चर्यजनकरूपेण वेदेषु ओजोन-आवरणस्य (Ozone Layer) उल्लेखः कृतोऽस्ति तत्र 'Ozone Layer' इत्यर्थे 'महत् उल्ब' इति शब्दो ध्वनितोऽस्ति। गर्भस्थभ्रूणस्य संरक्षकमावरणं 'उल्बं' शब्देन व्यपदिष्टो भवति। ऋग्वेदस्याथर्ववेदस्य च अनेकेषु मन्त्रेषु आम्नातमस्ति यत् पृथिवी एकेनावरणेन आच्छादितोऽस्ति। आवरणमिदमतिसघनमस्ति महत् तदुल्बं स्थविरं तदासीद्येनाविष्टितः।[१६] अथर्ववेदेऽस्य आवरणस्य वर्णः 'हिरण्ययः' उक्तोऽस्ति।[१७] उल्ब (Ozone) आवरणस्य कार्यं पृथिव्याः संरक्षणमस्ति। अस्य आवरणस्य क्षरणं गर्भस्थभ्रूणस्य आवरणस्य क्षरणमिव घातकमस्ति।

पर्यावरणशुद्धीकरणस्य पारिस्थितिकी-संतुलनस्य संरक्षा-प्रक्रियारूपेण वृक्षारोपणात् वनसंरक्षणात् पृथक् यज्ञस्य माहात्म्यम् उपयोगित्वं च वेदेषु वैदिकवाङ्मयेषु च विशिष्टरूपेण प्रतिपादितमस्ति। यज्ञः एका वैज्ञानिकी प्रक्रियास्ति, यस्मिन् विविधगुणसम्पन्नानां वृक्षवनस्पत्योषधीनाम् उपयोगिस्वास्थ्यप्रदांशानां वाष्पीकरणम् उत्परिवर्तनं च भूत्वा तेषां वातावरणे प्रसारणं मिश्रणं च भवति। विविधयागेषु प्रयुक्तानां हविर्द्रव्याणामपि एकं विज्ञानमस्ति। विशिष्टपदार्थानां मिथः सम्मिश्रणेन विशिष्टगुणसम्पन्नानां हविर्द्रव्याणां हुते सति वायुमण्डले एकः विशिष्टः प्रभावः उत्पन्नो भवति। वेदमन्त्रोच्चारणशक्त्या तस्मिन् प्रभावे अधिकतरा शोभनतरा च वृद्धिः जायते। ये जनाः यज्ञेषु सम्मिलिताः भवन्ति, तेषां उपरि, समीपवर्ति- वातावरणे च अयं प्रभावः दीर्घतरः भवति। वातावरणे Oxygen-Carbondioxide सन्तुलनं विधाय ओजोन-आवरण-क्षरणक्षम-रासायनिकविषाक्तगैसीयद्रव्याणां घातकविकिरणानां च न्यूनीकरणे शून्यीकरणे वा साहाय्यं करोति यज्ञोऽयम्। अतः वेदशास्त्रेषु सर्वत्र अयं यज्ञः स्वास्थ्यप्रदपदार्थानां जनकरूपेण तथा मनुष्याणां कृते लाभप्रदप्रभावाणां सद्भावनापूर्णजीवनदर्शनानां विधायकरूपेण वर्णितोऽस्ति।[१८]

पर्यावरणप्रसङ्गे वैदिकसमाजे जनानां न केवलं सर्वेषु पर्यावरणघटकेषु समीचीना जागरूकतासीत्, किन्तु तेषां रक्षणा-वेक्षणेऽपि विविधाः उपायाः वेदेषु समुपलभ्यन्ते। चतुर्षु बहुत्र पर्यावरणस्य महत्त्वं वर्णितं वर्तते। अनेनानुमीयते यद् वैदिकजनाः पर्यावरणप्रदूषणविषये तथा तस्य निराकरणविषये च सचेतनाः आसन्। ते च मन्त्रद्रष्टारः ऋषयः प्रत्यक्षरूपेण परोक्षरूपेण वा पर्यावरणरक्षायै समाजस्य ध्यानं प्रदूषणं प्रति समाकृष्टवन्तः। वैदिक-ऋषिभिः पर्यावरणसंरक्षणाय यावन्तः उपायाः प्रदर्शिताः स्वयं च तैः पर्यावरणस्य यावत्संरक्षणं कृतं, तदद्य न सम्भवति। वैदिककाले पृथिवीं, जलम्, अग्निं, वायुं, वनस्पतींश्च देवतां मत्वा भक्तिभावनया ओतप्रोतैः ऋषिभिः यज्ञमाध्यमेन प्राकृतिकस्रोतसां प्राकृतिकशक्तीनाञ्च संरक्षा कृता। अतः तस्मिन् समये पर्यावरणप्रदूषणस्य समस्या नासीत्। अस्माकं प्राचीना संस्कृतिः तपोवनसंस्कृतिः आसीत्। प्रकृतिः स्वकीयैः सम्पूर्णैः संसाधनैः परिपूर्णासीत्।

सम्प्रति आधुनिकसभ्यतायाः संसाधनानां विकासेन तेषां प्रसारेण च वायुजलपृथिव्यन्तरिक्षेषु च सर्वत्र प्रदूषणमतित्वरया वर्द्धमानमस्ति। अद्य औद्योगिकक्रान्तिकारणात् बह्व्यः पर्यावरणीयसमस्याः समुत्पन्नाः सन्ति। मोटरवाहनेभ्यः उद्योगेभ्यश्च निःसरन् धूमः विषाक्तवायुः गैसीयद्रव्यञ्च वातावरणं प्रदूषयत् ओजोन-आवरणस्य क्षरणे प्रमुखं कारणभूतं जातमस्ति। ओजोनआवरणे छिद्रकारणात् सूर्यरश्मीनां घातकप्रभावेण कर्कटसदृशाः असाध्यरोगाः, वायुप्रदूषणकारणात् श्वाससम्बन्धिरोगाश्च वर्द्धमानाः सन्ति। विश्वपरिदृश्ये भूमण्डलीयः तापः, ओजोन-आवरणस्य क्षरणं, औद्योगिक-अपशिष्टानां निस्तारणं, कीटनाशकानां वायुजलभूमिषु च दृश्यमानः दुष्प्रभावः विकरालसमस्यारूपेण अनुभूयते। औद्योगीकरणजनसंख्यावृद्धेश्च कारणात् सम्प्रति वनानि च्छिद्यन्ते। परिणामस्वरूपं वन्यजीवानाम् अस्तित्वं संकटापन्नमस्ति। प्रकृतेः अनुशासने विकृते जाते ऋतुषु अवाञ्छितं परिवर्तनमपि दृश्यते। पृथिव्याः तापः अनुदिनं वर्द्धते, येन न केवलं मानवजीवनम्,

Vijnana Bharati

अपितु सम्पूर्णजीवजगतः अस्तित्वं संकटापन्नमस्ति। प्राकृतिकं सन्तुलनं, पर्यावरणीय सन्तुलनं, पारिस्थितिकीयं सन्तुलनं च विकृतं जातमस्ति। संकटस्य समाधानाय कोऽपि अल्पव्ययसाध्यः मार्गः उपायो वा अद्यतनैः वैज्ञानिकैः न दृश्यते। पर्यावरणसंरक्षणाय अद्य सम्पूर्णं विश्वं सचिन्तमस्ति। एतादृश्यामवस्थायां वेदः तत्प्रतिपादितः यज्ञश्च सामाजिक-सांस्कृतिक-अभ्युदयाय, पर्यावरणीयसमस्यायाः समाधानाय, वर्द्धमानस्य प्रदूषणस्य निवारणाय च एकमात्रम् अवलम्बनं भवितुमर्हति।[११] यज्ञोऽयं न केवलं बाह्यप्रदूषणानां निवारणाय शमनाय वा सर्वोत्तमं प्रभावशालिसाधनमस्ति, अपितु समाजे व्याप्तम् आन्तरिकं प्रदूषणमपि अपाकरोति। अतः साम्प्रतं यज्ञानुष्ठानस्य महती आवश्यकतास्ति।

यज्ञः प्रकृतेः स्थूलतत्त्वेषु शक्तिं, शुचितां, सुगन्धिं च संवर्द्धयन् पर्यावरणस्य संरक्षणं करोति। यज्ञस्य प्रभावः अतिव्यापकः भवति। कुत्रापि विधिवद् अनुष्ठीयमानो यज्ञः न केवलं स्थानविशेषं क्षेत्रविशेषं वा अपि तु सार्वत्रिकं वातावरणं पर्यावरणं वा प्रभावयति। यज्ञाग्नौ विविधप्रकाराणाम् ओषधीनाम् वनस्पतीनां च हवनं भवति। यज्ञाग्निः आहुतानामोषधीनां शक्तिं सहस्रगुणितं वर्धयित्वा तां वायुमण्डले विकिरति, येन अनेकेषां रोगकृमीणां विषाक्तगैसीयद्रव्याणां च विनाशो भवति। यज्ञाग्नेः औषधीयगुणैः सम्पूर्णे क्षेत्रे अतित्वरया प्रदूषणं समाप्तं भूत्वा वायुमण्डलं परिशुद्धं भवति।[२०] यज्ञाग्निना वायुः सुरभितः सुवासितश्च भवति।

वातावरणे यज्ञस्य प्रभावमध्येतुं शान्तिकुञ्जहरिद्वारस्थितेन ब्रह्मवर्चशोधसंस्थानेन केचन वैज्ञानिकाः प्रयोगाः कृताः सन्ति।[२१] एकस्मिन् प्रयोगे विविधप्रकारेषु दारुषु प्रज्वालितेषु इदं ज्ञातं यत् आम्रकाष्ठस्य प्रज्वालने कार्बन मोनो-ऑक्साइड उत्सर्जनं (Co-Emission) न्यूनतमं शून्यप्रायं वा भवति। अतः यज्ञार्थं सम्प्रति सर्वसुलभम् आम्रकाष्ठं समिद्रूपेण सर्वाधिकं ग्राह्यमस्ति। ब्रह्मवर्चशोधसंस्थानेन वातावरणपरिशोधनाय कृतेषु यागप्रयोगेषु सामान्यहविर्द्रव्येण सह संस्थानेन निर्धारितं विशिष्टं हविः, शुद्धगोघृतम् आम्रसमिधश्च प्रयुक्ताः। एतेषु यागप्रयोगेषु वातावरणीयगन्धे (Atmospheric odour) वायवीयसूक्ष्मजीविषु, गैसीयप्रदूषकेषु यथा- $NO_2$, $SO_2$, RSPM इत्यादिषु यज्ञस्य प्रभावः आकलितः। वातावरणीयगन्धसंदर्भे यज्ञस्य प्रभावः सुखदरूपेणाश्चर्यजनकरूपेण च अतीव शोभनः आसीत्। एकः रुचिकरः सुगन्धिः सायं पर्यन्तमनुभूता। अपरेद्युरपि एका क्षीणा सुगन्धिः तत्र अवर्तत। एषः प्रयोगः अन्तःकक्षीयः आसीत्।

वातावरणीयसूक्ष्मजीविष्वपि (Air Microflora) यज्ञस्य प्रभावमध्येतुं संस्थानेन बहवः अन्तःकक्षीयाः बहिःकक्षीयाश्च प्रयोगाः अनुष्ठिताः। एकस्मिन्नन्तःकक्षीये प्रयोगे दिनत्रयं यावत् यज्ञानुष्ठानस्य प्रभावः सूक्ष्मजीविषु (Microbes) विशेषतः रोगाणुषु (Pathogenes) आकलितः। तृतीये दिवसे रोगाणूनां संख्यायां (count of pathogenes) सप्तषष्टिप्रतिशतं प्रभृति शतप्रतिशतं यावत् न्यूनता दृष्टा। परिणामोऽयं तथ्यमिदं प्रमाणयति यद् यज्ञः वातावरणे परिव्याप्तं घातकरोगाणूनां विनाशाय सुकरं साधनमस्ति।[२०] एवं यज्ञः संक्रामकरोगाणां निवारणाय, जनस्वास्थ्यसंवर्द्धनाय च अल्पव्ययसाध्यः सुलभोपायोऽस्ति।

यतः अस्माकं जीवनभूतेषु प्राणेषु शक्ति-संरचणं वायुनैव भवति, फलतः यज्ञमाध्यमेन शुद्धीकृतेन वायुना अस्माकं प्राणशक्तिः बलोर्जःसम्पन्ना भूत्वा आरोग्यवर्द्धिका जायते। यथा सूर्यः स्वश्क्त्या संसारस्य पूतिगन्धिम् अपाकरोति, जलं च पुनाति तथैव मनुष्यकृतेनाग्निहोत्रेणापि इमे द्वे कार्ये सम्पाद्येते। यज्ञैः न केवलं वायुमण्डलं परिशुद्धं भवति, अपितु सम्पूर्णस्य पर्यावरणस्यापि संरक्षणं भवति। अग्नौ हुतं हविः धूमरूपेण वायुमाध्यमेन उपरि गत्वा अन्तरिक्षे प्रसरति, कालक्रमेण तदेव हविः पुनः मेघमण्डलेन सह मिलित्वा वर्षामाध्यमेन अधः अवतरत् सर्वान् प्राणिनः तर्पयति।

सम्प्रति अन्ताराष्ट्रियसमस्यासु प्रदूषणकारणादुत्पन्ना शुद्धपेयजलसमस्या अतीव गभीरास्ति। संभाव्यते यत् कालान्तरे जलाभावे प्रकृतिः नष्टा भविष्यति, यतः जीवनमेव जलं विना न सम्भवति। परिशोधितं शुद्धजलमेव जीवैः ग्राह्यं भवति। सागरस्य अपेयं जलं तु पक्षिणः अपि न पिबन्ति, मनुष्याणां तु का कथा। अस्म्कम् ऋषयः शुद्धजलार्थं गभीरतया विचारितवन्तः। ऋग्वेदे विविधेषु सूक्तेषु मन्त्रेषु च अपां चिन्तनं दृष्टिपथमायाति। जलमेवावति प्रकृतिम्, अतएव वैदिकवाङ्मये प्रार्थनापूर्वकम् आज्येन हव्येन च ऋषयः वरुणदेवं पूजयन्ति जलस्य रक्षणार्थं निवेदयन्ति च। यजुर्वेदेऽथर्ववेदे च बहुशः जलविज्ञानं वर्णितमस्ति। तत्र वृष्टिकर्मसम्बद्धं सर्वमपि स्वरूपजातं वृष्टिविज्ञानस्य मौलिकं सिद्धान्तस्वरूपं निर्दिष्टमस्ति। तत्र च वृष्टिकर्मणः उद्देश्यकोटौ कृषिचिकित्सा भूमि- ओषधिवनस्पत्यादिपदार्थजातानां संरक्षणं संवर्द्धनं च समायाति। एतादृशानां साध्यरूपाभिलषितानां फलानां समवाप्तये साधनकोटि-अन्तर्गतानि विविधानि यागस्वरूपाणि प्रतिपादितानि सन्ति।

प्रयोगैः इदमपि प्रमाणितमस्ति यत् यज्ञभस्मना पृथिव्याः उर्वरा शक्तिः अतितरां वर्द्धते। यज्ञद्वारा परिशोधितेन जलवायुना

Vijnana Bharati

शस्यानां फलवृक्षाणां च समुचितं संवर्द्धनं भवति, परिणामतः अन्नस्य, शाकस्य, फलस्य च उत्पादने वृद्धिः जायते। एवं यज्ञस्य सूक्ष्मप्रभावेण पृथिव्यां सर्वेषां प्राणिनां परिपालनं, पोषणं धारणञ्च भवति – यज्ञेन ध्रियते पृथिवी।[२१] अतएव यज्ञः अस्माकं संस्कृतेः इष्टः आराध्यश्चास्ति।

यज्ञानुष्ठानेन अन्तरिक्षे अदृश्यरूपेण एतादृशं सद्भावपूर्णं सूक्ष्मं वातावरणं विनिर्मितं भवति, येन जगति प्रसृताः रोगशोक-भयक्लेशद्वेषदम्भान्यायात्याचाराश्च नश्यन्ति, सुखशान्तिसद्भावनस्य वृद्धिश्च जायते।[२२] साम्प्रतिके काले यज्ञानुष्ठानम् अतितराम-पेक्षितमावश्यकं च प्रतिभाति, येन सूक्ष्मे ज़गति असुरशक्तीनां तीव्रतरा वृद्धिः विरमेत्[२३] तथा क्षीयमाणा देवशक्तयः परिपुष्टाः सन्तुष्टाश्च भूत्वा शान्तिमयं वातावरणं सृजेयुः। देवजनितविक्षोभानां निवारणार्थं, पर्यावरणसंरक्षणार्थं, मानवानां सुखशान्तिकल्याणार्थञ्च वैज्ञानिको-पायोऽस्ति अयं यज्ञः।[२४] यज्ञः परमार्थप्रयोजनाय अनुष्ठीयमानः एकः उच्चस्तरीयः पुरुषार्थोऽस्ति। ऐहिकमामुष्मिकं वा सर्वविधफलं यज्ञेनैव शक्यम् – 'यज्ञोऽयं सर्वकामधुक्। सकलकर्मसुश्रेष्ठत्वात् यज्ञः विश्वस्मिन् परमाराध्यं वस्तु अस्ति – 'यज्ञो वै श्रेष्ठतमं कर्म'।[२५]

*सन्दर्भ :*


१. अथर्ववेदः – ९.१५.४; श०ब्रा० ९.१०.१४; यजुर्वेद – २३.६२

२. ऋग्वेदः – १०.९०.९-१०

३. का०पु० – ३१.४०

४. यजुर्वेदः – प्र०ख०तृ०अ० – १२

५. ऐ०ब्रा० – १.७; वि०पु० – ६.१.१८

६. का०श्रौ०सू० १.२.२; ऐ०ब्रा० १.१ (सायणभाष्य) पृ० ७; मत्स्यपुराणे यज्ञस्य लक्षणम्।

७. कपि०शा०- प्रथमो हि यज्ञः; गीता ३.१०।

८. ऋग्वेदसंहिता – १.१.१।

९. ऋग्वेदसंहिता, पुरुषसूक्त – १०.९०.१६।

१०. महानारायणो० ७९।

११. महा०भा०, आश्व०, अध्याय – ९२; अथर्ववेद – ९.२६; श०ब्रा०- २.३.९.६; तै०सं० ५.३.१२.२।

१२. अथर्ववेदः – १८.४.२; ऐ०ब्रा० १२-१०; श०ब्रा० १.२.३.३.७; महाभाष्यम् – ६.१.८१।

१३. अथर्ववेदः – ३.२१.१०; द्र०ऋ०वे० १०.३५.२; १०.६६.९-१०; १०.६४.८।

१४. अथर्ववेदः – ८.१५; १.४.४।

१५. ऋग्वेदः – ६.३७.३।

१६. ऋग्वेदः – १०.५१.१।

१७. अथर्ववेदः – ४.२.८।

१८. गीता – ३.१२; महाभारतम्, अनुशासनपर्व, अध्यायः १४५।

१९. छा०उ० – ४.१६.१।

२०. अथर्ववेदः – २.३१.१

२१. का.पु. ३२.७.२।

२२. ऋ.वे.सं. – १.१७३.२; अथर्ववेद – १९.५५.३-४।

२३. का.पु. २०.१६।

२४. मत्स्यपुराणम् ९३.११७।

२५. श.ब्रा. १.७.४.५; तु.का.स. ३०.१०; कपि.शा. ४.६.६; का.सं. ३०.१०।